श्री काळिका स्तोत्रं 2

श्री काळिका स्तोत्रं 2

दधन्नैरंतर्यादपि मलिनचर्यां सपदि यत्
सपर्यां पश्यन् सन् विशतु सुरपुर्यां नरपशुः |
भटान्वर्यान् वीर्यासमहरदसूर्यान् समिति या
जगद्धुर्या काळी मम मनसि कुर्यान्निवसतिं || 1 ||

लसन्नासामुक्ता निजचरणभक्तावनविधौ
समुद्युक्ता रक्तांबुरुहदृगलक्ताधरपुटा |
अपि व्यक्ताऽव्यक्तायमनियमसक्ताशयशया
जगद्धुर्या काळी मम मनसि कुर्यान्निवसतिं || 2 ||

रणत्सन्मंजीरा खलदमनधीराऽतिरुचिर-
-स्फुरद्विद्युच्चीरा सुजनझषनीरायिततनुः |
विराजत्कोटीरा विमलतरहीरा भरणभृत्
जगद्धुर्या काळी मम मनसि कुर्यान्निवसतिं || 3 ||

वसाना कौशेयं कमलनयना चंद्रवदना
दधाना कारुण्यं विपुलजघना कुंदरदना |
पुनाना पापाद्या सपदि विधुनाना भवभयं
जगद्धुर्या काळी मम मनसि कुर्यान्निवसतिं || 4 ||

रधूत्तंसप्रेक्षारणरणिकया मेरुशिखरात्
समागाद्या रागाज्झटिति यमुनागाधिपमसौ |
नगादीशप्रेष्ठा नगपतिसुता निर्जरनुता
जगद्धुर्या काळी मम मनसि कुर्यान्निवसतिं || 5 ||

विलसन्नवरत्नमालिका
कुटिलश्यामलकुंतलालिका |
नवकुंकुमभव्यभालिका-
-ऽवतु सा मां सुखकृद्धि काळिका || 6 ||

यमुनाचलद्दमुना दुःखदवस्य देहिनां |
अमुना यदि वीक्षिता सकृच्छमु नानाविधमातनोत्यहो || 7 ||

अनुभूति सतीप्राणपरित्राणपरायणा |
देवैः कृतसपर्या सा काळी कुर्याच्छुभानि नः || 8 ||

य इदं काळिकास्तोत्रं पठेत्तु प्रयतः शुचिः |
देवीसायुज्यभुक् चेह सर्वान् कामानवाप्नुयात् || 9 ||

इति श्री काळिका स्तोत्रं |